जटाधरः ॥ काणः २१ धूलिजङ्घः २२ निसिन्तक्षत् २३ कौशिकारिः २४ चिरायुः २५ मुखरः २६ खरः २७ महालोलः २८ चिरञ्जीवी २९ चलाचलः ३० करटकः ३१ नागवीरकः ३२ गाढ़मैथुनः ३३ लुराटकः ३४ श्रावकः ३५ रतज्वरः ३६ । इति शब्दरत्नावली ॥ * ॥ अस्य शाकुनं काकचरित्रम् । तद्यथा ।

"अथोच्यते काकरुतं रुतानां
मूर्द्धि स्थितं शाकुनभाषितानाम् ।
अचिन्तितावेदितकार्य्यसिद्धिं
पूर्व्वादिकाष्ठाप्रहरक्रमेण ॥
ये ब्राह्मणक्षत्रियवैश्यशूद्राः
काका भवन्त्यन्त्यजपञ्चमास्ते ।
वर्णाकृतिभ्यां ऋषिभाषिताभ्यां
सदाभियुक्तैरुपलक्षणीयाः ॥
वृहत्प्रमाणो गुरुदीर्घतुण्डो
दृढ़स्वरः कृष्णवपुः स विप्रः ।
पिङ्गाक्षनीलाक्षविमिश्रवर्णः
स्यात् क्षत्रियः क्रोष्टारवोऽतिशूरः ॥
यः पाण्डुनीलः सितनीलचक्षु-
र्नात्यर्थरूढ़ो रटितश्च वैश्यः ।
भस्मच्छविर्भूरिककारशब्दः
शूद्रः कृशाङ्गश्चपलो निरूक्षः ।
विरूक्षसूक्ष्मास्यतनुर्व्विशङ्को
यः कन्धरादीप्तनवं बिभर्त्ति ।
स्थिरारवः स्थैर्य्यसमेतबुद्धिः
काकोऽन्त्यजातिः खलु पञ्चमोऽत्र ॥
द्रोणाभिधः कृष्णवपुर्द्विजो यो
ग्राह्यः स काकः खलु मुख्यवृत्त्या ।
तस्मादृते श्यामगलो निरीक्ष्यः
श्वेतश्च निन्द्योऽद्भुतदर्शनोऽसौ ॥
विप्रः स्फुटे जल्पति पृच्छ्यमाने
न्यूनं ततः क्षत्रियजातिराङ्कः ।
आख्याति वैश्यस्त्वधिवासनेन
ब्रवीति शूद्रो बलिदानलोभात् ॥
प्रश्नं कृतं जल्पति कृष्णवर्णः
सदा समस्तं विहगोऽन्त्यजातिः ।
सद्यस्त्रिसप्ताहदशाहपक्षैः
पञ्चापि काकाः फलदाः क्रमेण ॥
शान्ते प्रदीप्ते च रटन् विहङ्गः
शुभप्रदो दीप्तपराङ्मुखः सन् ।
न क्वापि रौद्रो रटितः प्रशस्तः
सर्व्वत्र शस्तो मधुरश्च रक्तः ॥
दीप्तस्थितो यः परुषस्वरेण
विरौति दीप्ताभिमुखः स कार्य्यम् ।
निष्पाद्य निर्णाशयते च सन्य-
ग्दीप्तोन्मुखः शान्तरवो हि सिद्ध्यै ॥
शान्तप्रदीप्ताभिमुखो विधाय
शब्दं प्रविशाय पुनः प्रदीप्तम् ।
यो रौति काको मधुरस्वरेण
हत्वा विरुद्धं स ददाति सिद्धिम् ॥
विधाय दीप्ताभिमुखो विरावं
ततः प्रशान्ताभिमुखो विरौति ।
यो वायसोऽसौ विनिहन्त्यसम्यक्
कार्य्याणि सर्व्वाणि पुनः करोति ॥
सूर्य्योदये पूर्व्वदिशि प्रशस्त-
स्थाने स्थितो योऽभिमुखं विरौति ।
नाशं रिपोश्चिन्तितकार्य्यसिद्धिं
स्त्रीरत्नलाभं स करोति काकः ॥
ध्वाङ्क्षः प्रभाते यदि वह्निभागे
विरौति तिष्ठन् रमणीयदेशे ।
शत्रून् प्रणश्यत्यचिरादिशङ्कः
प्रयाति योषित्समवाप्यते तत् ॥
रुवन् प्रभाते दिशि दक्षिणस्यां
काकः समावेदयतेऽतिदुःखम् ।
रोगार्त्तिमृत्युं परुषस्वरेण
रम्येण चेष्टागमयोषिदाप्तिम् ॥
नैरृत्यभागे यदि च प्रभाते
करोति काकः सहसा विरावम् ।
क्रूरं ततः कर्म्म समभ्युपैति
दूतागमो मध्यमिका च सिद्धिः ॥
प्रातः प्रतीच्यां यदि रौति काको
ध्रुवं तदा वर्षति वारिवाहः ।
स्त्रीवस्त्रभूभृत्पुरुषागमश्च
कलिः कलत्रेण समं तदा स्यात् ॥
ध्वाङ्क्षस्य शब्दे पवनालयस्थे
वस्त्रान्नयानाभिमतागमाः स्युः ।
पान्थागमः प्राक्तनवृत्तिनाशः
स्यादन्यदेशे गमनं स्वदेशात् ॥
दिश्युत्तरस्यां सुरवः प्रभाते
निरीक्षमाणो बलिभुग् नराणाम् ।
ददाति दुःखं भुजगाच्च भीतिं
दरिद्रतां नष्टधनेष्टलाभम् ॥
दिशीशवत्यां यदि रौति काक
श्चागच्छतस्तद्वनितान्त्यजाती ।
व्याधेर्निमित्तं प्रियवस्त्रलाभो
भवेत्तदा रोगबलेऽवसानम् ॥
ब्रह्मप्रदेशे स्थितवायसस्य
प्रभातकाले मधुरस्वरेण ।
अभीप्सितार्थागमनं ध्रुवं स्यात्
स्वामिप्रसादो द्रविणस्य लाभः" ॥

इति वसन्तराजे दिक्प्रहरे सूर्य्योदयः ॥ * ॥

"पूर्व्वत्र यामे प्रथमे सशब्दः
काको भवेच्चिन्तितकार्य्यसिद्ध्यै ।
अभीष्टलोकागमनं तथास्या-
न्नष्टार्थलाभो नियतं नराणाम् ॥
आग्नेयभागे यदि चाद्ययामे
स्त्रीलाभविद्वेषिवधौ भवेताम् ।
कृतान्तभागे बलिभुग् विरावः
स्त्रीलाभसौख्यप्रियसङ्गकारी ॥
नैरृत्यकोणे प्रिययोषिदाप्ति-
र्मिष्टाशनं सिध्यति चिन्तितोऽर्थः ।
दिशि प्रतीच्यां विरुते भवेता-
मभ्यर्थनीयागमनाम्बुवृष्टी ॥
वायव्यकोणे करटः शुभः स्यात्
नृपप्रसादोऽध्वगदर्शनं च ।
सौम्ये च भीस्तस्करशोकवार्त्ता
सौम्या च वार्त्ता धनलाभवार्त्ता ॥
ईशानदेशेऽभिमतेन पुंस-
स्त्रासो कृताशाद् बहुलोकसङ्गः ।
ब्रह्मप्रदेशे सुखकामभोगः
सम्मानसम्पद्द्रविणाप्तसिद्धिः" ॥

इति प्रथम प्रहरः ॥ * ॥

"प्राच्यां द्वितीये प्रहरे विरावैः
काकस्य कश्चित् पथिकोऽभ्युपैति ।
चौराद्भयं व्याकुलता च वह्नो
जायेत काचिन्महती च शङ्का ॥
कृताशदेशे नियतं कलिः स्यात्
प्रियागमाकर्णनयोषिदाप्तिः ।
याम्ये तु वृष्टिर्महती च भीतिः
प्रियस्य चेष्टस्य समागमः स्यात् ॥
रक्षोदिशि प्राणभयं तदा स्युः
स्त्रीभोज्यलाभाखिलरुक्प्रणाशाः ।
भवेत् प्रतीच्यां प्रबलाबलाप्ति-
र्योषागमो वृद्धि कुवर्षणञ्च ॥
समीरभागे ध्वजचौरसङ्गो
दूतागमस्त्रीपिशिताम्नलाभः ।
सौम्ये गणेष्टागमनं जयश्च
रम्ये रवे चौरभयं त्वरण्ये ॥
महेश्वराशाविरुतश्च काक-
श्चौराग्निसन्त्रासविरुद्धवार्त्ताः ।
ब्रवीति रूक्षैरटनैररूक्षैः
सदार्थगुर्व्वागमनं जयञ्च ॥
ब्रह्मप्रदेशे प्रहरे द्वितीये
काकः सुशब्दो नृपतिप्रसादम् ।
मिष्टान्नभोज्यञ्च ददाति पुंसां
करोत्यसौ चौरभयं कुशब्दः" ॥

इति द्वितीयप्रहरः ॥ * ॥

"ऐन्द्रयां विरूक्षः प्रहरे तृतीये
वृद्धिं तथा चौरभयं ब्रवीति ।
कृष्णास्तु राजागमनं जयञ्च
करोति यात्रां शुभकार्य्यसिद्धिम् ॥
अग्नेर्विभागेऽग्निभयं कलिञ्च
विरुद्धवार्त्तां विफला च यात्रा ।
भवेद्विरुद्धैर्व्वलिभुग्विरावै-
र्जयादिवार्त्ता च भवेद्विशुद्धिः ॥
काकुभ्यवाच्यां कुरुतेऽतितूर्णं
रोगं तथाप्तागमनं विहङ्गः ।
क्षुद्राणि कार्य्याणि च यान्ति सिद्धिं
सर्व्वाणि तन्मुख्यतया नराणाम् ॥
क्रव्याददेशे जलदागमः स्या-
न्मिष्टान्नलाभो रिपवो न सन्ति ।
शूद्रागमः स्वामिविरुद्धवार्त्ता
भवन्ति यात्रासु च कार्य्यनाशः ॥
स्यात् पश्चिमे नष्टधनस्य लाभो
दूराध्वयानं सुहृदागमश्च ।